ed for by an association, in the author's mind, of the god Brahmā with the *śabdabrahma* of Bh. G. VI, 44 on which I have already expressed my opinion (p. 180). I may still recall the fact (see Monier-Williams' Dict., s. v. *brahman*) that the neuter word *brahma* means also the Brāhmaṇical caste of which god Brahmā is the highest representative, and sometimes even an individual Brahmin.

F. OTTO SCHRADER

Commentary on Śāradātanaya's Bhāvaprakāśa is not a Myth but a Reality

In the *Indian Historical Quarterly* for June 1929 (vol. V, no. 2, p. 347), Mr. K. S. Ramasvamy Śāstrin writes a note on the non-existence of a manuscript-commentary on the *Bhāvaprakāśa* of Śāradātanaya under the heading "*A Mythical Commentary on Śāradātanaya's Bhāvaprakāśa*" in which he states that he was engaged in editing for the Gaekwad's Oriental Series the above work and in that connection had to consult Mr. S. K. De's work on *Sanskrit Poetics* where he learnt that a manuscript-commentary on the *Bhāvaprakāśa* was available in the Bhandarkar Oriental Research Institute. Learning this he examined the manuscript and discovered that the alleged commentary was not a commentary on the *Bhāvaprakāśa* of Śāradātanaya which deals with dramaturgy, but with a work of the same name on Grammar. Therefore, he infers that Mr. De made a mistake in alluding to the work in question as a treatise on Dramaturgy.

It should not, however, be thought that there is no commentary extant. Ten years ago the late Dr. Ganapati Śāstrin secured a manuscript of the *Bhāvaprakāśa* the merits of which I came to learn when I heard some extracts from the work read to me. In 1924, I was fortunate to obtain another manuscript of the above work and a commentary on the same in Central Travancore. The commentary struck me as an exceptional work which could bear comparison with the *Śṛṅgāraprakāśa* of King Bhoja. Some friends of mine have transcribed passages from these manuscripts.

In 1927, I learnt that the Baroda Oriental Research Institute was preparing an edition of the *Bhāvaprakāśa* for their series and that

by that time nearly 200 pages of the text had been printed. Learning this, I informed Mr. B. Bhattacharya of the Institute that I had a copy of the *Bhāvaprakāśa* which I was willing to lend them. In my letters, I think, I must have mentioned the existence of the manuscript-commentary also.

As I think that the manuscript-commentary is a fine work, I append hereto a few extracts which will give some indication of its nature and merits. I understand that Mr. M. Ramkrishna Kavi of Madras has undertaken the work of publication of the *Bhāvaprakāśa* with the commentary.

EXTRACTS

भावप्रकाशव्याख्या

१ अथ तत्रभवान् शारदातनयो नाम विद्वान् शारदादेवीप्रसादात् कृतसकलशास्त्रपरिश्रमः स्वपरिशीलितदर्शशास्त्रप्रौढिं लोकस्य दिदर्शयिषुः, काव्यमीमांसां सङ्गीतमीमांसां च काव्यप्रकाशे शारदीयाख्ये प्रबन्धे च निश्चायविपर्ययं विधाय रसान् भावांश्च मीमांसयितुं भावप्रकाशिकाख्यं नाट्यप्रकरणं चिकीर्षुः, चिकीर्षितस्य प्रकरणस्य निरन्तरायपरिपूर्तये प्रचयगमनाय च शिष्टाचारपरम्पराप्राप्तं मङ्गलमाचरन् सर्वमङ्गलानन्दनिधानं गजाननं नाट्यगतपदार्थकदम्बैरेव विशेषणैरभिष्टौति—प्रस्थीतत्मदलत्यरित्यादि। ननु चिकीर्षितस्य प्रकरणस्य नाट्यैकविषयत्वान्मङ्गलाशंसनश्लोकेऽपि नाट्यप्रस्तावनैव कर्तुमुचिता, न नृत्तगीतवाद्यानामिति चेत्—सत्यम्; वाक्यार्थाभिनयात्मकस्य नाट्यस्य पदार्थीभूतावान्तरवाक्यार्थाभिनयात्मकेन नृत्तेन विना निष्पत्तेरभावात् नाट्यं प्रति तस्योपयोगः, अभिनेयमानवाक्यार्थादेर्वाचकत्वेन गीतानामुपयोगः, नृत्तगीतगतकालपरिच्छेदकत्वेन वाद्यानामिति तूर्यत्रया अपि नाट्योपयोगित्वात् तत्प्रस्तावनोचितैव।

प्रस्थीतत् प्रकर्षेण स्यन्दमानः यो मदस्तेन मत्तो यमरिकाभृङ्गारः स एव गीतं यस्मिन् कर्मणीति क्रियाविशेषणम्। दुहुर्हेलया यद् ह्रेतितं गजगर्जितमित्यभिधानम्, तटैव वादनं वाद्यं तेन व्यतिकरः सम्बन्धो यस्मिन् कर्मणीति च, नृत्यन्नित्यनेन पदार्थाभिनयात्मकं नृत्तमेवोच्यते, न गात्रविक्षेपमात्रमभिप्रेयते तालत्रयेकात्मकं यन्नृत्यमिति सूचयति—भावोल्लसत्क्रियमिति। भावा विभावादयो वाक्यार्थस्य स्थायिनः पदार्थाः, तदनुगुणमुल्लसन्त्यः प्रकृष्टाः क्रियाः अङ्गोपाङ्गप्रत्यङ्गव्यापारा यस्मिन्निति क्रियाविशेषणम्। एवं नृत्यन् करिमुखो नः सुखायास्तु, गात्रविक्षेपकत्वेन क्लेशरूपं नृत्यं विदधानः कथं वः सुखाय स्यादित्याशंक्य अस्य नृत्तस्य नाट्यपर्यवसायित्वात् तत्साधननृत्तकर्तुः सुखदायित्वसूचितमेवेत्याह—पण्योपहारैरिरादानन्दीति। अनन्दीत्यनेन को रसोऽभिनेयत्वेन सूचित इत्याकाङ्क्षायां गणेशस्य हास्याधिदैवतत्वात् स एवाभिनेय इति दर्शयितुं तद्विभावादीन् सूचयति—पण्योपहारैरिति। पण्योपहाराः खण्डखड्डुकादीनि भक्ष्यद्रव्याणि तैरानन्दीति। इत्थं प्रतीतं नटस्य रसनिष्ठत्वं उपमानप्रदर्शनमुखेन निवारयति—नटभावितैरित्यादि। नटोऽपि रसानुभवदशायां स्वात्मानिक एवेत्यर्थः।

२ अथ विदितमन्त्रसदाचारः प्रबन्धकर्ता स्वदेशं स्वाभिजात्यं स्वोत्पत्तिपरिपाटिं स्वविद्यापारम्पर्यं स्वविद्यावाप्तिनिदानं शास्त्रकर्तृपारम्पर्यं च वर्णयन् स्वाधिकारिप्रयोजनसम्बन्धमभिधेयं प्रतिजानीते—आर्यावर्तोदय इत्यारभ्य भावप्रकाशनं नाम शास्त्रं करोमीत्यन्तेन।

* * * *

६ परगतसुखदुःखाद्यनुभवेन चित्तस्य तदनुकूलतः परगतसुखदुःखानुकूल्येन तत्रावभासनं रागाद्यनुकार्यत्वापादनं येन भवेत्तत्सत्त्वम्। तेन निर्वृत्ता भावाः सात्त्विका इत्यर्थः। ननु सत्त्वाभिधेयानां भावानां मनआरभ्यानुभावत्वमुक्तम्। अत एते हि सत्त्वादयः सत्त्वजत्वादनुभावेष्वेवान्तर्भवन्तु, किं पृथगुपादानेन इत्यत आह—

अनुभावत्वसामान्ये सत्यपि त्रय्यात्मया।
सत्त्वेन सत्त्वजत्वाद्धि तेऽपि सत्त्वादयो मताः॥

* * * *

४ अयमत्राभिसन्धिः—सञ्चारिणो द्विधा स्वतन्त्राः परतन्त्राश्च, तत्र ये रसान्तरपोषकास्ते परतन्त्राः अनेकविधाः स्वतन्त्राः। तत्र परतन्त्रनिर्वेदो यथा—कुर्युः शास्त्रकथामग्नी इत्यादि। अत्र निर्वेदस्य क्रोधाङ्गत्वम्। निर्वेदस्य स्वतन्त्रत्वं यथा प्राणाः प्रियः सकलेत्यादि। अत्र निर्वेदस्यानन्याङ्गत्वात् स्वतन्त्रत्वम्। नन्वत्र निर्वेदस्य शान्तरसस्थायित्वं केचिदुक्तम्, महाकविप्रयोगेषु तथा दर्शनात्। यथा च भवभूतेः—न ध्यातं पदमित्यादि। (अत्र) शान्तरसस्थायित्वात् कथमनन्याङ्गत्वं निर्वेदस्येति चेत्—उच्यते—सत्यि खलु शमे सौमासम्भावनां (?) स्थायित्वं नाम संस्कारपाटवेन पुनः पुनर्नवीभावः। तेन निर्वेदवासनावासितभावकचेतसि नैष्कर्म्ये नाभिमतेषु विभावादिषु तत्तज्ज्ञानयोधूतफलस्य निर्वेदस्योत्पत्तिरेव न सङ्कुचति, किम्पुनः स्थायित्वम्? किञ्च सति निर्वेदे स्थायिनि शान्तरूपे भावकानां [क्षोद.....चेत्] चिरगतकदलीफलास्वादलम्पटानां राजगुक्कानां विवेकसहोदरो भवेत्। अतः स्थायित्वमेव तस्य नास्ति, कुतः शान्तरसं प्रति स्थायित्वमिति विशेषः। न ध्यातं पदमित्यत्र तु न शान्तरसस्थायित्वं निर्वेदस्य, किन्तु शृङ्गारहास्यवीरभक्तिरसान् प्रति व्यभिचारित्वमेवेत्यलम्।

* * * *

५ उद्दिष्टान् भावगतान् भावादीन् रसोपादानलपर्यन्तान् निरूप्य सहर्षणादीन्यवशिष्टान् भावगतभावान् पुरस्तादाख्यास्यामीति प्रथमाधिकारं परिसमापयति—

तदर्शनानि तान्युक्तानि त्रिधर्मा: पृथग्विधाः।
परस्परस्य सामर्थ्यं साङ्कर्यात् क्वचित् क्वचित्॥
रसोदयानुकूल्येन तत्र तत्रैव वक्ष्यति।
सहर्षणादयो भावा रसोदयसमये वक्ष्यन्त इत्यर्थः। इति भावनिर्णयाख्यः प्रथमोऽधिकारः।

* * * *

All these extracts are taken from the first chapter. Nothing is known about the author of the commentary. He has given illustrations from various works, and mentions many authors and works.

V. VENKATARAM SHARMA